# vishvamUrtistotram

# વિશ્વમૂર્તિસ્તોત્રમ્ અથવા વિશ્વમૂર્ત્યષ્ટકસ્તોત્રમ્

## Document Information

Text title : vishvamUrtistotram

File name : vishvamUrtistotram.itx

Category : shiva

Location : doc_shiva

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 20, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# વિશ્વમૂર્તિસ્તોત્રમ્ અથવા વિશ્વમૂર્ત્યષ્ટકસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

અકારણાયાખિલકારણાય નમો મહાકારણકારણાય ।
નમોऽસ્તુ કાલાનલલોચનાય કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૧॥

નમોऽસ્ત્વહીનાભરણાય નિત્યં નમઃ પશૂનાં પતયે મૃડાય ।
વેદાન્તવેદ્યાય નમો નમસ્તે કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૨॥

નમોऽસ્તુ ભક્તેહિતદાનદાત્રે સર્વૌષધીનાં પતયે નમોऽસ્તુ ।
બ્રહ્મણ્યદેવાય નમો નમસ્તે કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૩॥

કાલાય કાલાનલસન્નિભાય હિરણ્યગર્ભાય નમો નમસ્તે ।
હાલાહલાદાય સદા નમસ્તે કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૪॥

વિરિઞ્ચિનારાયણશક્રમુખ્યૈરજ્ઞાતવીર્યાય નમો નમસ્તે ।
સૂક્ષ્માતિસૂક્ષ્માય નમોऽઘહન્ત્રે કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૫॥

અનેકકોટીન્દુનિભાય તેऽસ્તુ નમો ગિરીણાં પતયેऽઘહન્ત્રે ।
નમોऽસ્તુ તે ભક્તવિપદ્ધરાય કૃતાગસં મામવ વિશ્વમૂર્તે॥ ૬॥

સર્વાન્તરસ્થાય વિશુદ્ધધામ્ને નમોऽસ્તુ તે દુષ્ટકુલાન્તકાય ।
સમસ્તતેજોનીધયે નમસ્તે કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૭॥

યજ્ઞાય યજ્ઞાદિફલપ્રદાત્રે યજ્ઞસ્વરૂપાય નમો નમસ્તે ।
નમો મહાનન્દમયાય નિત્યં કૃતાગસં મામવ વિશ્વમૂર્તે ॥ ૮॥

ઇતિ સ્તુતો મહાદેવો દક્ષં પ્રાહ કૃતાઞ્જલિમ્ ।
યત્તેऽભિલષિતં દક્ષ તત્તે દાસ્યામ્યહં ધ્રુવમ્ ॥ ૯॥

અન્યચ્ચ શ◌ૃણુ ભો દક્ષ યચ્ચ કિઞ્ચિદ્બ્રવીમ્યહમ્ ।
યત્કૃતં હિ મમ સ્તોત્રં ત્વયા ભક્ત્યા પ્રજાપતે ॥ ૧૦॥

યે શ્રદ્ધયા પઠિષ્યન્તિ માનવાઃ પ્રત્યહં શુભમ્ ।

નિષ્કલ્મષા ભવિષ્યન્તિ સાપરાધા અપિ ભુવમ્ ॥ ૧૧॥

ઇતિ દક્ષકૃતં વિશ્વમૂર્તિસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*vishvamUrtistotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*